# RAMAKRISHNA MISSION VIDYAMANDIRA
(Residential Autonomous College affiliated to University of Calcutta)

**B.A./B.Sc. FIFTH SEMESTER EXAMINATION, DECEMBER 2018**
**THIRD YEAR [BATCH 2016-19]**
**SANSKRIT [Honours]**
**Paper : VI**

Date : 21/12/2018
Time : 11 am – 3 pm
Full Marks : 100

## Group - A

1. कस्यचन **एकस्य** प्रश्नस्योत्तरं लेख्यम्। [1×10]
   a) रुद्राध्याय: कस्मिन् वेदेऽन्तर्भवति ? यथारुद्राध्यायं रुद्रदेवतास्वरूपं प्रतिपादयत। [1+9]
   b) भूमिसूक्तं कस्मिन् वेदे वर्तते ? अस्य सूक्तस्य क ऋषि: ? सूक्ते अस्मिन् प्रतिपादितं भूमिवैशिष्ट्यं समासेनोपस्थापनीयम्। [1+1+8]

**OR,**

यथेच्छं **मन्त्रद्वयं** बङ्गभाषया आङ्गलभाषया वा अनूद्यताम्। [2×5]
   a) विश्वंभरा वसुधानी प्रतिष्ठा हिरण्यवक्षा जगतो निवेशनी।
   वैश्वानरं बिभ्रती भूमिरग्निमिन्द्रऋषभा द्रविणे नो दधातु।।
   b) असंबाधं मध्यतो मानवानां यस्या उद्वत: प्रवत: समं बहु।
   नाना वीर्या ओषधीर्या बिभर्ति पृथिवी न: प्रथतां राध्यतां न:।।
   c) या ते रूद्र शिवा तनूरघोराऽपापकाशिनी।
   तया नस्तन्वा शन्तमया गिरिशन्ताभिचाकशीहि।।
   d) यामिषुं गिरिशन्त हस्ते बिभर्ष्यस्तवे।
   शिवां गिरित्र तां कुरु मा हिंसी: पुरुषं जगत्।।

2. यथेच्छं **प्रश्नस्यैकस्यो**त्तरं लेख्यम्। [1×10]
   a) "स एकया पृष्टो दशभि: प्रत्युवाच" – क: केन पृष्ट: ? प्रश्नश्च अत्र क: ? प्रश्नस्योत्तररूपेण दशभि: ऋग्भि: प्रतिपादितं विषयं संक्षेपेण लिखत। [1+1+8]
   b) भवत्पाठ्यमनुमत्स्यकथानुसारं प्लावनवृत्तान्त उपन्यसनीय:। देशान्तरे एतादृशवृत्तमुपलभ्यते न वेति सोदाहरणं प्रतिपादयत। [8+2]

**OR,**

यस्य कस्यचिद् **अनुच्छेदद्वयस्य** आङ्गलभाषया बङ्गभाषया वा अनुवाद: कार्य:। [2×5]
   a) तस्य ह त्रय: पुत्रा आसु: शुन:पुच्छ: शुन:शेप: शुनोलाङ्गूल इति। तं होवाच–ऋषेऽहं ते शतं दादाम्यहमेषामेकेनाऽऽत्मानं निष्क्रीणा इति।
   b) कलि: शयानो भवति संजिहानस्तु द्वापर:।
   उत्तिष्ठंस्त्रेता भवति कृतं सम्पद्यते चरंश्चरैवेति।।
   c) स होवाच। यावद्वै क्षुल्लका भवामो बह्वी वै नस्तावन्नाष्ट्रा भवत्युत मत्स्य एव मत्स्यं गिलति कुम्भ्यां माऽग्रे बिभरासि स यदा तामतिव्वर्धाऽ अथ कर्षूं खात्वा तस्यां मां बिभरासि।
   d) मनवे ह वै प्रात:। अवनेग्यमुदकमाजहुर्यथेदं पाणिभ्यामवनेजनायाहरन्त्येवं तस्यावनेनिजानस्य मत्स्य: पाणीऽआपदे।

3. यथेच्छ**मेकस्य** प्रश्नस्योत्तरं प्रदेयम्। [1×10]

a) बृहदारण्यकोपनिषत् कस्मिन् वेदेऽन्तर्भवति? अस्या एतादृशनामकरणे किं बीजम्? अस्यामुपनिषदि प्रतिपादितां जीवात्मन उत्क्रान्तिं समासेन विवृणुत। [1+2+7]

b) बृहदारण्यकोपनिषत्स्थं मैत्रेयी–याज्ञवल्क्यसंवादं संक्षेपेण उपस्थापयत।

4. बङ्गभाषया आङ्गलभाषया वा यथेच्छं **द्वयोर**नुवादः कार्यः। [2×6]

a) अन्धं तमः प्रविशन्ति येऽविद्यामुपासते।
ततो भूय इव ते तमो य उ विद्यायां रताः।।

b) स एष नेति नेत्यात्माऽगृह्यो न हि गृह्यतेऽशीर्यो न हि शीर्यतेऽसङ्गो न हि सज्यतेऽसितो न व्यथते न रिष्यते विज्ञातारम् अरे केन विजानीयाद् इत्युक्तानुशासनाऽसि मैत्रेयि...।

c) स यथा सैन्धवघनोऽनन्तरोऽबाह्यः कृत्स्नो रसघन एवैवं वा अरेऽयमात्मानन्तरोऽबाह्यः कृत्स्नः प्रज्ञानघन एवैतेभ्यो भूतेभ्यः समुत्थाय तान्येवानुविनश्यति। न प्रेत्य संज्ञास्तीत्यरे ब्रवीमीति होवाच याज्ञवल्क्यः।

d) सर्वं तं परादाद् योऽन्यत्रात्मनः सर्वं वेदेदं ब्रह्मेदं क्षत्रमिमे लोका इमे देवा इमे वेदा इमानि भूतानीदं सर्वं यदयमात्मा।

5. कश्चि**देको** मन्त्रः सप्रसङ्गं व्याख्येयः। [1×8]

a) आत्मा वा अरे द्रष्टव्यः श्रोतव्यो मन्तव्यो निदिध्यासितव्यो मैत्रिय्यात्मनि खल्वरे दृष्टे श्रुते मते विज्ञात इदं सर्वं विदितम्।

b) मनसैवानुद्रष्टव्यं नेह नानास्ति किञ्चन।
मृत्योः स मृत्युमाप्नोति य इह नानेव पश्यति।।

## Group - B

6. **एकस्य** प्रश्नस्योत्तरं वैशद्येन देयम्। [1×12]

a) कर्मप्रवचनीयविषयमधिकृत्य लघुनिबन्धो लेख्यः।

b) साधकतमं करणम् इति सूत्रं विस्तरेण व्याख्याय हेतुकरणयोर्भेदः सोदाहरणं दर्शनीयः।

c) कृद्योगे प्राप्तायाः षष्ठ्याः निषेधस्थलं विस्तरेण ससूत्रमुपपाद्यताम्।

7. यथेच्छं **द्वयोः सूत्रयोः व्याख्या विधेया**। [2×7]

a) अकथितं च

b) आख्यातोपयोगे

c) ध्रुवमपायेऽपादानम्

d) यस्य च भावेन भावलक्षणम्

8. यथेच्छं **पङ्क्तिद्वयस्य** व्याख्या विधेया। [2×4]

a) प्रत्ययार्थे परिमाणे प्रकृत्यर्थः अभेदेन संसर्गेण विशेषणम्, प्रत्ययार्थस्तु परिच्छेद्यपरिच्छेदकभावेन व्रीहौ विशेषणमिति विवेकः।

b) कर्म इत्यनुवृत्तौ पुनः कर्मग्रहणम् आधारनिवृत्त्यर्थम्।

c) विनापि तद्योगं तृतीया वृद्धो यूना तल्लक्षणश्चेदेव विशेषः इति निर्देशात्।

d) विभाषा इति योगविभागाद् अगुणे स्त्रियां च क्वचित्।

9. उपरिष्टादुक्तं यथेच्छं **द्वय**मुपजीव्य टिप्पणी विधेया। [2×3]

a) प्रातिपदिकार्थः

b) सम्प्रदानम्

c) कारकम्

d) अधिकरणम्

10. यथेच्छं रेखाङ्कितानां **पञ्चानां** सकारणं विभक्तिनिर्णयः कार्यः। [5×2]

a) अलं महीपाल तव श्रमेण।

b) विषवृक्षोऽपि संवर्ध्य स्वयं छेत्तुमसांप्रतम्।

c) नृसिंहाय नमस्कुर्मः।

d) वाच्यस्त्वया मद्वचनात् स राजा।

e) अल्पस्य हेतोर्बहु हातुमिच्छन् विचारमूढः प्रतिभासि मे त्वम्।

f) पापे अभिनिवेशः।

g) उत्तरेण ग्रामं नदी।

h) न्याये अधीत्ययं निपुणः साहित्ये।

———— × ————